Name & Signature of the Invigilator

.............................................

.............................................

# SANSKRIT

## PAPER – II

## CODE-07

OMR Answer Sheet No. : 

Roll No. : 

(in figures as in Hall Ticket)

Roll Number in words : ..................................

..............................................................

Question Booklet Sl. No.

070478

**Time : 2 Hours]** **No. of Printed Pages : 16** **[Maximum Marks : 200**

## Instructions for the Candidates

1. Write your Roll Number in the space provided on the top of this page.
2. This paper consists of **one hundred (100)** multiple choice type of questions. **All** questions are compulsory.
3. At the commencement of examination, the question booklet will be given to you. In the first 5 minutes, you are requested to open the booklet and compulsorily examine it as below :
   (i) To have access to the Question Booklet, tear off the paper seal on the edge of this cover page. Do not accept a booklet without sticker seal and do not accept an open booklet.
   (ii) Tally the number of pages and number of questions in the booklet with the information printed on the cover page. Faulty booklets due to pages/questions missing or duplicate or not in serial order or any other discrepancy should be got replaced immediately by a correct booklet from the invigilator within the period of 5 minutes. Afterwards, neither the Question Booklet will be replaced nor any extra time will be given.
   (iii) After this verification is over, the Test Booklet Number should be entered on the OMR Answer Sheet and the OMR Answer Sheet Number should be entered on this Test Booklet.
4. Each item has four alternative responses marked (A), (B), (C) and (D). You have to darken the oval as indicated below on the correct response against each item.
   **Example**: (A) ● (C) (D) where (B) is the correct response.
5. Your responses to the items are to be indicated on the OMR Answer Sheet under Paper – II only. If you mark your response at any place other than in the oval in the OMR Answer Sheet, it will not be evaluated.
6. Rough Work is to be done in the end of this booklet.
7. If you write your Name, Roll Number, Phone Number or put any mark on any part of the OMR Answer Sheet, except for the space allotted for the relevant entries, which may disclose your identity, or use abusive language or employ any other unfair means, such as change of response by scratching or using white fluid, you will render yourself liable to disqualification.
8. You have to return the original OMR Answer Sheet to the invigilator at the end of the examination compulsorily and must not carry it with you outside the Examination Hall. You are however, allowed to carry original question booklet and duplicate copy of OMR Answer Sheet on conclusion of examination.
9. Use only Blue/Black Ball point pen.
10. Use of any calculator or any electronic devices or log table etc., are prohibited.
11. There shall be no negative marking.

## પરીક્ષાર્થીઓ માટે સૂચનાઓ

1. આ પાનાની ટોચ પર દર્શાવેલી જગ્યામાં તમારો રોલ નંબર લખો.
2. આ પ્રશ્નપત્રમાં બહુવૈકલ્પિક ઉત્તરો ધરાવતા સો (૧૦૦) પ્રશ્નો આપેલા છે. બધા જ પ્રશ્નો ફરજિયાત છે.
3. પરીક્ષાની શરૂઆતમાં આપને પ્રશ્નપુસ્તિકા આપવામાં આવશે. પ્રથમ પાંચ (૫) મિનિટ દરમ્યાન તમારે પ્રશ્નપુસ્તિકા ખોલી અને ફરજિયાતપણે નીચે મુજબ પરીક્ષણ કરવું :
   (i) પ્રશ્નપુસ્તિકાનો વપરાશ કરવા માટે આ કવર પૃષ્ઠની ધાર પર આપેલ સીલ સ્ટીકર ફાડી નાખો. કોઈપણ સંજોગોમાં સીલ સ્ટીકર વગરની કે ખુલ્લી પ્રશ્નપુસ્તિકા સ્વીકારશો નહીં.
   (ii) કવર પૃષ્ઠ પર છપાયેલ નિર્દેશાનુસાર પ્રશ્નપુસ્તિકાના પ્રશ્નો, પૃષ્ઠો અને સંખ્યાને બરાબર ચકાસી લો. ખામીયુક્ત પ્રશ્નપુસ્તિકા કે જેમાં પ્રશ્નો/ પૃષ્ઠો ઓછાં હોય, બે વાર છપાયા હોય, અનુક્રમમાં અથવા અન્ય કોઈ ફરક હોય અર્થાત કોઈપણ સંજોગોમાં ખામીયુક્ત પ્રશ્નપુસ્તિકા સ્વીકારશો નહીં. અને જો ખામીયુક્ત પ્રશ્નપુસ્તિકા મળી હોય તો નિરીક્ષક પાસેથી તુરંત જ બીજી સારી પ્રશ્નપુસ્તિકા મેળવી લેવી. આ માટે ઉમેદવારને પાંચ (૫) મિનિટનો સમયગાળો આપવામાં આવશે. પછીથી, પ્રશ્નપુસ્તિકા બદલવામાં આવશે નહીં કે કોઈ વધારાનો સમયગાળો આપવામાં આવશે નહીં.
   (iii) આ ચકાસણી સમાપ્ત થાય પછી, પ્રશ્નપુસ્તિકાનો નંબર OMR જવાબ પત્રક પર લખવો અને OMR જવાબ પત્રકનો નંબર પ્રશ્નપુસ્તિકા પર લખવો.
4. પ્રત્યેક પ્રશ્ન માટે ચાર જવાબ વિકલ્પ (A), (B), (C) અને (D) આપવામાં આવેલ છે. તમારે સાચા જવાબના ઓવલ (oval) ને નીચે આપેલ ઉદાહરણ મુજબ પેનથી ભરીને સંપૂર્ણ કાળું કરવાનું રહેશે.
   **ઉદાહરણ** : (A) ● (C) (D) કે જ્યાં (B) સાચો જવાબ છે.
5. આ પ્રશ્નપુસ્તિકાના પ્રશ્નોના જવાબ અલગથી આપવામાં આવેલ OMR જવાબ પત્રકમાં પેપર-II લખેલ વિભાગમાં જ અંકિત કરવા. જો આપ OMR જવાબ પત્રકમાં આપેલ ઓવલ (oval) સિવાય અન્ય સ્થાને જવાબ અંકિત કરશો તો તે જવાબનું મૂલ્યાંકન કરવામાં આવશે નહીં.
6. કાચું કામ (Rough work) પ્રશ્નપુસ્તિકાના અંતિમ પૃષ્ઠ પર કરવું.
7. જો આપ OMR જવાબ પત્રક નિયત જગ્યા સિવાય અન્ય કોઈપણ સ્થાને, આપનું નામ, રોલ નંબર, ફોન નંબર અથવા એવું કોઈ ચિહ્નકે જેનાથી તમારી ઓળખ થઈ શકે, અંકિત કરશો અથવા અભદ્ર ભાષાનો પ્રયોગ કરો, અથવા અન્ય કોઈ અનુચિત સાધનોનો ઉપયોગ કરો, જેમકે અંકિત કરી દીધેલ જવાબ ભૂંસી નાખવો કે સફેદ શાહીનો ઉપયોગ કરી બદલશો તો આપને પરીક્ષા માટે અયોગ્ય જાહેર કરવામાં આવશે.
8. પરીક્ષા સમય પૂરો થઈ ગયા બાદ ઓરીજીનલ OMR જવાબ પત્રક જે તે નિરીક્ષકને ફરજિયાત સોપી દેવું અને કોઈ પણ સંજોગોમાં તે પરીક્ષા ખંડની બહાર લઈ જવું નહીં. પરીક્ષા પૂર્ણ થયા બાદ ઉમેદવાર ઓરીજીનલ પ્રશ્નપુસ્તિકા અને OMR જવાબ પત્રકની ડુપ્લિકેટ કોપી પોતાની સાથે લઈ જઈ શકે છે.
9. માત્ર કાળી / ભૂરી બોલ પોઈન્ટ પેન વાપરવી.
10. કેલ્ક્યુલેટર,લોગ ટેબલ અને અન્ય ઈલેક્ટ્રોનિક યંત્રોનો ઉપયોગ કરવાની મનાઈ છે.
11. ખોટા જવાબ માટે નકારાત્મક ગુણાંકન પ્રથા નથી.

DO NOT WRITE HERE

# SANSKRIT
## Paper – II

1. 'सत्यं वद । धर्मं चर । स्वाध्यायान्मा प्रमदः' – इति मन्त्रांश-सम्बद्धा उपनिषद् का ?

(A) ईशावास्योपनिषद्
(B) केनोपनिषद्
(C) तैत्तिरीयोपनिषद्
(D) श्वेताश्वतरोपनिषद्

2. सामवेदसम्बद्धेयमुपनिषदस्ति ___________।

(A) बृहदारण्यकोपनिषद्
(B) कठोपनिषद्
(C) तैत्तिरीयोपनिषद्
(D) केनोपनिषद्

3. अधस्तनयुग्मानां समीचीनां तालिकां चिनुत ।

| | |
|---|---|
| a. उपेन्द्रवज्रा | i. त त ज गु गु |
| b. शालिनी | ii. ज त ज र |
| c. वंशस्थः | iii. ज त ज गु गु |
| d. इन्द्रवज्रा | iv. म त त गु गु |

| | a | b | c | d |
|---|---|---|---|---|
| (A) | iv | iii | ii | i |
| (B) | iii | i | ii | iv |
| (C) | iii | iv | ii | i |
| (D) | i | iv | ii | iii |

4. द्वादशलक्षणी का ?

(A) स्मृतिः
(B) विद्या
(C) परा विद्या
(D) मीमांसा

5. पदार्थधर्मसंग्रहः कस्य भाष्यम् ?

(A) व्योमशिवाचार्यस्य
(B) उदयनाचार्यस्य
(C) प्रशस्तपादस्य
(D) लौगाक्षिभास्करस्य

6. सतः सज्जायत इति के वदन्ति ?

(A) सौगताः
(B) नैयायिकाः
(C) सांख्याः
(D) वेदान्तिनः

7. सम्प्रज्ञातसमाधौ किं भवति ?

(A) वृत्तीनां निरोधो भवति ।
(B) स्मृतिर्नोदेति ।
(C) धारणा जायते ।
(D) तत्वज्ञानमुत्पद्यते ।

8. अधस्तनयुग्मानां समीचीनां तालिकां चिनुत ।

| | |
|---|---|
| a. दण्डी | i. मृच्छकटिकम् |
| b. अश्वघोष: | ii. मुद्राराक्षसम् |
| c. शूद्रक: | iii. दशकुमारचरितम् |
| d. विशाखदत्त: | iv. बुद्धचरितम् |

| | a | b | c | d |
|---|---|---|---|---|
| (A) | iii | i | ii | iv |
| (B) | iii | iv | i | ii |
| (C) | iv | iii | i | ii |
| (D) | ii | iv | i | iii |

9. के चतुर्विद्यया भावनया परमपुरुषार्थं कथयन्ति ?

(A) बौद्धा:
(B) जैना:
(C) चार्वाका:
(D) सांख्या:

10. 'याज्ञवल्क्यशिक्षा' केन वेदेन सह सम्बद्धा ?

(A) ऋग्वेदेन सह
(B) यजुर्वेदेन सह
(C) सामवेदेन सह
(D) अथर्ववेदेन सह

11. 'अथातो ब्रह्मजिज्ञासा' इत्यस्मिन् सूत्रे 'ब्रह्मण:' इत्यत्र शाङ्करभाष्यानुसारं कीदृशी षष्ठी ?

(A) कर्तरि – षष्ठी
(B) कर्मणि – षष्ठी
(C) शेषे – षष्ठी
(D) न काऽपि

12. पृथिवी–संज्ञके पञ्चीकृते स्थूलभूते अग्ने: मात्रा अस्ति ______________ ।

(A) 12.5%
(B) 25%
(C) 50%
(D) 100%

13. अपरिग्रहस्य परिगणनं केषु भवति ?

(A) यमेषु
(B) नियमेषु
(C) क्रियायोगेषु
(D) क्लेषेषु

14. रघुवंशमहाकाव्यस्य प्रथमसर्गे वसिष्ठाश्रमाभिगमनप्रसङ्गे श्लोके वर्णितं 'लोकालोक:' पदं कस्य वाचकमस्ति ?

(A) वसिष्ठस्य
(B) दिलीपस्य
(C) पर्वतस्य
(D) अनिर्वाणस्य दन्तिन:

15. 'वि-राघवन्' महोदयस्य जन्मवर्षं किमासीत् ?

(A) १९०८ (B) १९१० (C) १९१५ (D) १९१८

16. मूलप्रकृतौ त्रिगुणविक्षोभात् जगत: विविधपदार्थानामुत्पत्तिरेव क उच्यते ?

(A) प्रतिसर्ग:
(B) सर्ग:
(C) वंश:
(D) मन्वन्तरम्

17. महाभारते का रीति: ?

(A) गौडी
(B) पाञ्चाली
(C) लाटी
(D) वैदर्भी

18. 'अर्थशास्त्रं' कति अधिकरणेषु विभक्तम् ?

(A) 10 (B) 15 (C) 20 (D) 18

19. 'प्रणव-प्रशंसा' कस्यां स्मृतौ प्राप्यते ?

(A) मनुस्मृतौ
(B) याज्ञवल्क्यस्मृतौ
(C) हारितस्मृतौ
(D) दक्षस्मृतौ

20. सम्प्रहारे प्रहरणै: प्रहाराणां परस्परम् ।
ठणत्कारै: श्रुतिगतैरुत्साहस्तस्य कोऽप्यभूत् ।।
– अस्मिन् कीदृशो रसदोष: ?

(A) स्वशब्दवाच्यतादोष:
(B) अनुचितार्थदोष:
(C) निरर्थकदोष:
(D) अवाचकदोष:

21. को गुण: शृंगारे द्रुतिकारणं भवति ?

(A) माधुर्यम्
(B) ओज:
(C) प्रसाद:
(D) श्लेष:

22. संकेतितार्थस्य बोधिका शक्तिः का ?

(A) लक्षणा
(B) अभिधा
(C) व्यञ्जना
(D) तात्पर्यम्

23. दशरूपके वीथ्यङ्गे 'दोषा गुणा गुणा दोषा यत्र स्युः' तत् किम् ?

(A) अवस्यन्दितम्
(B) अधिबलम्
(C) मृदवम्
(D) त्रिगतम्

24. अर्थसङ्ग्रहानुसारं वेदभागः कति विधः ?

(A) द्विविधः
(B) त्रिविधः
(C) चतुर्विधः
(D) पञ्चविधः

25. ब्रह्मसूत्रशाङ्करभाष्यमतानुसारं 'देहमात्रं चैतन्यविशिष्टमात्मेति' केषां मतम् ?

(A) जैनानाम्
(B) लौकायतिकानाम्
(C) माध्यमिकानाम्
(D) सौत्रान्तिकानाम्

26. पतञ्जलियोगसूत्रस्य व्यासभाष्यानुसारं ख्यातिविषया गुणाधिकार विरोधिन्यो: वृत्तयः ______ ।

(A) क्लिष्टाः
(B) अक्लिष्टाः
(C) क्लिष्टाक्लिष्टाः
(D) न का अपि

27. 'गच्छति पुरः शरीरं धावति पश्चाद् असंस्तुतं चेतः ।' अभिज्ञानशाकुन्तले कालिदासः कस्य वर्णनमत्र करोति ?

(A) विदूषकस्य
(B) दुष्यन्तस्य
(C) काश्यपस्य
(D) भरतस्य

28. स्फोटवादस्य रचयिता कः ?

(A) वरदराजः
(B) नागेशभट्टः
(C) भट्टोजिदीक्षितः
(D) कैय्यटः

29. रामानन्दः कः ?

(A) तत्वदीपिका–टीकाकारः
(B) तत्वबोधिनी–टीकाकारः
(C) बालमनोरमा–टीकाकारः
(D) प्रौढमनोरमा–टीकाकारः

30. कस्य सम्यक् प्रयोगेण ब्रह्मलोके महीयते ?

(A) पदस्य (B) वर्णस्य

(C) शब्दस्य (D) कारकस्य

31. 'चकार'– पदे 'च' कीदृशः ?

(A) अन्वादेशः (B) अपृक्तः

(C) अभ्यासः (D) अपवादः

32. 'कर्मणि कुशलः' इति कस्याः लक्षणाया उदाहरणम् ?

(A) प्रयोजनवती–लक्षणायाः (B) रूढिलक्षणायाः

(C) भागत्यागलक्षणायाः (D) केवललक्षणायाः

33. स्तोकेनोन्नतिमायाति
स्तोकेनायात्यधोगतिम् ।
अहो सुसदृशी वृत्ति–
स्तुलाकोटेः खलस्य च ।।
इत्यस्मिन् पद्ये कोऽलंकारः ?

(A) अतिशयोक्तिः (B) विभावना

(C) निदर्शना (D) अर्थश्लेषः

34. 'उर्जोनपात्' – कस्याः वैदिकदेवतायाः विशेषणम् ?

(A) विष्णोः (B) अग्नेः (C) सूर्यस्य (D) वरुणस्य

35. 'थ' इत्यस्योच्चारणस्थानं किम् ?

(A) तालु (B) कण्ठः (C) दन्तः (D) ओष्ठम्

36. विष्णोः परमपदं किम् ?

(A) पृथिवी (B) स्वर्गः (C) पातालम् (D) अन्तरिक्षम्

37. 'द्वादश' पदे कः समासः ?

(A) अव्ययीभावः (B) तत्पुरुषः

(C) कर्मधारयः (D) द्वन्द्वः

38. 'अहो उदग्ररमणीया पृथिवी' – वाक्यं कस्मिन्नाटके प्राप्यते ?

(A) अभिज्ञानशाकुन्तले
(B) मुद्राराक्षसे
(C) वेणीसंहारे
(D) प्रसन्नराघवे

39. केन्टुम्-शतम्-वर्गयोर्विभक्तो भाषा-परिवार: क: ?

(A) भारोपीयपरिवार:
(B) सुडानीपरिवार:
(C) हाईपरबोरीपरिवार:
(D) सामीपरिवार:

40. अप्रगल्भा: पदन्यासे जननीरागहेतव: ।
सन्त्येके बहुलालापा: कवयो बालका इव ।।
इति श्लोक: कस्य कवे: ?

(A) भवभूते:
(B) भारवे:
(C) त्रिविक्रमभट्टस्य
(D) माघस्य

41. याज्ञवल्क्यानुसारं कीदृशा: कार्य-चिन्तका: भवेयु: ?

(A) वेदज्ञा: शुचयोऽलुब्धा:
(B) दैवज्ञा: कार्यकुशला:
(C) शास्त्रज्ञा: वेदपारगा:
(D) सत्पुरुषा मनीषिण:

42. किं नाम संफेट: ?

(A) शास्त्रवचनम्
(B) काव्यम्
(C) रोषभाषणम्
(D) ज्ञानम्

43. किं नाम उपक्षेप: ?

(A) बीजन्यास:
(B) शास्त्रज्ञानम्
(C) उपमानम्
(D) प्रक्षेपणम्

44. संस्कृतध्वनिषु क: सर्वाधिको महत्त्वपूर्ण: ?

(A) दन्त्य:
(B) तालव्य:
(C) कण्ठय:
(D) मूर्धन्य:

45. विवृतं कति मात्रिकं भवति ?

(A) द्विमात्रिकम्
(B) एकमात्रिकम्
(C) त्रिमात्रिकम्
(D) चतुर्मात्रिकम्

**46.** उष्मण: गति: कति विधा ?

(A) पञ्चविधा  (B) अष्टविधा

(C) त्रिविधा  (D) द्विविधा

**47.** 'वषट्' योगेन का विभक्तिर्भवति ?

(A) द्वितीया  (B) तृतीया

(C) चतुर्थी  (D) सप्तमी

**48.** 'पाक्य' इत्यस्मिन् क: प्रत्यय: ?

(A) क्यप्  (B) ण्यत्

(C) यत्  (D) ल्यप्

**49.** 'तनिता' तन् – धातो: कस्य लकारस्य रूपम् ?

(A) लट्  (B) लृट्

(C) लोट्  (D) लुट्

**50.** 'नर्तकी' इत्यस्मिन् पदे क: प्रत्यय: ?

(A) ङीप्  (B) ङीष्

(C) विनि  (D) क्तिन्

**51.** 'कुटिलं व्रजति' इत्यस्य यङन्त-रूपं किम् ?

(A) जङ्गम्यते  (B) वाव्रज्यते

(C) वव्रज्यते  (D) वाव्राज्यते

**52.** 'आत्मन: गङ्गामिच्छति' इत्यस्य नामधातु-रूपं किम् ?

(A) गङ्गीयति  (B) गङ्गायते

(C) गङ्गियते  (D) गाङ्गीयते

**53.** एतेषु किं ब्राह्मीलिपे: ककारमस्ति ?

(A) क  (B) +

(C) ><  (D) ϰ

54. भारतीयपरम्परायां लेखनकलाया आदिप्रवर्तकः कः ?

(A) ब्रह्मा
(B) गणेशः
(C) पाणिनिः
(D) बृहस्पतिः

55. भारतवर्षे लेखनकलायाः प्राचीनतम उल्लेखः कस्यामुपलभ्यते ?

(A) रोमनसभ्यतायाम्
(B) युनानीसभ्यतायाम्
(C) सिन्धुसभ्यतायाम्
(D) ग्रीकसभ्यतायाम्

56. अशोकस्य ब्राह्मीलिपि-शिलालेखस्य प्रथमपाठकः क आसीत् ?

(A) जेम्स प्रिंसेप
(B) विलियम जोन्स
(C) याकोबी
(D) ए. ए. मेकडोनल

57. अरण्यकाण्डे कति सर्गाः सन्ति ?

(A) 68
(B) 67
(C) 77
(D) 75

58. शिब्युपाख्यानं कस्मिन् पर्वणि वर्णितमस्ति ?

(A) आदिपर्वणि
(B) सभापर्वणि
(C) वनपर्वणि
(D) विराटपर्वणि

59. ऋतुकालं प्रतीक्षन्ते नार्थिनः सुसमाहिते ।
सूक्तिरियं कुत उद्धृतास्ति ?

(A) महाभारतात्
(B) अर्थशास्त्रात्
(C) याज्ञवल्क्यस्मृतेः
(D) रामायणात्

60. बुध-इला-पुरूरवा-आख्यानं कस्मिन् ग्रंथे वर्णितमस्ति ?

(A) ऋग्वेदे
(B) रामायणे
(C) महाभारते
(D) अथर्ववेदे

61. 'मन्त्रिपरिषदं द्वादशामात्यान्कुर्वीत' इति केषां मतम् ?

(A) माध्यमिकानाम्
(B) मानवानाम्
(C) औशनसाम्
(D) बार्हस्पत्यानाम्

62. ब्राह्मणानां विवेच्य-विषयोऽस्ति __________ ।

(A) वास्तुशास्त्रम्
(B) विधिः
(C) शिक्षा
(D) व्याकरणम्

63. शतं चाष्टहस्तपरिमितं भवति नाट्यगृहम् __________ ।

(A) विकृष्टम्
(B) चतुर्भुजम्
(C) चतुरस्रम्
(D) त्र्यस्रम्

64. 'पञ्च पञ्च नखाः भक्ष्याः' इत्यत्र को विधिः ?

(A) प्रयोगविधिः
(B) परिसंख्याविधिः
(C) नियमविधिः
(D) अधिकारविधिः

65. सतत्त्वतोऽन्यथा प्रथा __________ ।

(A) विकारः
(B) विवर्तः
(C) वस्तु
(D) अवस्तु

66. दशकुमारचरिते अनन्तवर्मणः सकलदुर्नयोपाध्यायः पैशुन्यपण्डितः सेवकः कः ?

(A) कामपालः
(B) इन्द्रपालितः
(C) क्षत्रपालितः
(D) विहारभद्रः

67. किन्नरयुगलम् अनुसरन् चन्द्रापीडः कुत्र अगच्छत् ?

(A) विन्ध्यगिरिं यावत्
(B) हेमकूटं यावत्
(C) अच्छोदसरोवरस्य पार्श्वे
(D) अलकायाः पार्श्वे

68. मन्त्राः कति विधाः ?

(A) त्रिविधाः
(B) द्विविधाः
(C) पञ्चविधाः
(D) षड्विधाः

69. पर्वतो धूमवान् वह्निमत्वादित्यत्र का उपाधिः ?

(A) इन्धनाभावोपाधिः
(B) आर्द्रेन्धनसंयोगः उपाधिः
(C) धूमवत्त्वमुपाधिः
(D) न कापि

70. एतेषु निगमनवाक्यं किम् ?

(A) तथा चायम्
(B) यत्र यत्र वह्निस्तत्र तत्र धूमः
(C) तस्मात्तथा
(D) यो धूमवान् सोऽग्निमान्

71. का रूपस्य हन्त्री व्यसनं बलस्य शोकस्य योनिर्निधनं रतीनामित्युक्तम् ?

(A) अविद्या
(B) जरा
(C) शक्तिः
(D) तृष्णा

72. हर्षचरितस्य पञ्चम-उच्छ्वासस्य नाम किम् ?

(A) राजप्रतिज्ञावर्णनम्
(B) महाराजमरणवर्णनम्
(C) चक्रवर्तिजन्मवर्णनम्
(D) राजवंशवर्णनम्

73. शाकपूणिः कः ?

(A) भाष्यकारः
(B) वृत्तिकारः
(C) निरुक्तकारः
(D) वार्त्तिककारः

74. निरुक्तं कति विधम् ?

(A) त्रिविधम्
(B) दशविधम्
(C) पञ्चविधम्
(D) द्वादशविधम्

75. 'अनाघ्रातं पुष्पं किसलयमलूनं कररूहै-
रनाविद्धं रत्नं मधु नवमनास्वादितरसम् ।'
अस्मिन् श्लोकार्धे किं छन्दः ?

(A) हरिणी
(B) मन्दाक्रान्ता
(C) पृथ्वी
(D) शिखरिणी

76. पापक्षयमात्रसाधनानि चान्द्रायणादीनि __________ कर्माणि ।

(A) प्रायश्चित्तानि
(B) काम्यानि
(C) निषिद्धानि
(D) नित्यानि

**77.** बाह्यविषयेन्द्रियाणां तद्व्यतिरिक्तविषयेभ्यो निवर्तनम् ________।

(A) शमः

(B) दमः

(C) उपरतिः

(D) तितिक्षा

**78.** कः दुरोदरच्छद्मजितां जगतीं नयेन जेतुं समीहते ?

(A) युधिष्ठिरः

(B) वनेचरः

(C) सुयोधनः

(D) दुःशासनः

**79.** 'विचित्रपरिषद्यात्रा' कस्य काव्यम् ?

(A) क्षमारावस्य

(B) वी. राघवन् महोदयस्य

(C) अम्बिकादत्तव्यासस्य

(D) श्रीधरभास्करवर्णेकरस्य

**80.** ऋग्वेदस्य कस्यां सूक्तौ विश्वोत्पत्तिरहस्यमुपवर्णितम् ?

(A) वरुणसूक्तौ

(B) ज्ञानसूक्तौ

(C) वाक्सूक्तौ

(D) पुरुषसूक्तौ

**81.** मेक्डानेलमहोदयेन वेदनिर्माणकालः ख्रैस्तसंवत्सरात्प्राक् ________ कथितः ।

(A) १५०० वर्षदेशीयः

(B) २५०० वर्षदेशीयः

(C) ३५०० वर्षदेशीयः

(D) ४५०० वर्षदेशीयः

**82.** सूत्रमिदं वाजसनेयसूत्रनाम्नाऽपि प्रसिद्धम् ।

(A) कात्यायनसूत्रम्

(B) आपस्तम्बसूत्रम्

(C) पारस्करगृह्यसूत्रम्

(D) बौधायनगृह्यसूत्रम्

**83.** ''संस्कृतम्'' कीदृशी भाषा विद्यते ?

(A) श्लिष्ट-योगात्मका भाषा

(B) अश्लिष्ट-योगात्मका भाषा

(C) प्रश्लिष्टा भाषा

(D) अयोगात्मका भाषा

**84.** पदार्थाभिनयः ________ ।

(A) हास्यः

(B) भावः

(C) विसंगतिः

(D) मार्गः

85. 'गुणवत्यगुणस्य सतस्तस्यार्थमपार्थकं चरति' इत्यत्र 'अगुणस्य' इति पदेन कस्य संकेतग्रहो भवति ?

(A) अहङ्कारस्य
(B) महाभूतस्य
(C) पुरुषस्य
(D) महत:

86. चूर्णादिपिण्डीभावहेतुर्गुण:

(A) स्नेह:
(B) प्रयत्न:
(C) रस:
(D) संस्कार:

87. विक्रमबाहो: सिंहलेश्वरस्य कञ्चुकी अस्ति ________ ।

(A) वीरसेन:
(B) हरदत्त:
(C) बाभ्रव्य:
(D) विजयवर्मा

88. वेदप्रतिपादिताखिलकर्मप्रतिपत्त्यर्थं ________ ग्रन्थानामुदय: ।

(A) ब्राह्मण-
(B) आरण्यक-
(C) योग-
(D) उपनिषद्-

89. 'शेवधिस्तेऽस्मि रक्ष माम्' – मनुस्मृतौ ब्राह्मणं प्रति का वदति ?

(A) वाक्
(B) विद्या
(C) मति:
(D) विदुषी

90. एकदेशं तु वेदस्य वेदाङ्गान्यपि वा पुन: ।
योऽध्यापयति वृत्त्यर्थं स: क: ?

(A) कर्मकर:
(B) आयोजक:
(C) उपाध्याय:
(D) सेवक:

91. सक्तुमिव तितउना पुनन्तो यत्र धीरा मनसा वाचमक्रत ।
अत्रा सखाय: सख्यानि जानते भद्रैषां लक्ष्मीर्निहिताधि वाचि ।।
अयं ऋग्वेदस्य मन्त्र: कस्यां सूक्तौ वर्तते ?

(A) वरुणसूक्तौ
(B) पर्जन्यसूक्तौ
(C) ज्ञानसूक्तौ
(D) अक्षसूक्तौ

92. दशरूपके वर्णितानि निर्वहणसन्धे: अङ्गानि कति ?

(A) एकादश
(B) द्वादश
(C) त्रयोदश
(D) चतुर्दश

93. 'उदसौ सूर्यो अगादुदिदं मामकं वचः ।

यथाऽहं शत्रुहोऽ सान्यसपत्नः सपत्नहा ।।'

वेदे कस्यां सूक्तौ अयं मन्त्रो दृश्यते ?

(A) सूर्यसूक्तौ
(B) कालसूक्तौ
(C) प्रजापतिसूक्तौ
(D) राष्ट्राभिवर्धनसूक्तौ

94. किं हृत्प्रतिष्ठम् अजिरं जविष्ठं चास्ति ?

(A) मनः
(B) श्रोत्रम्
(C) नेत्रम्
(D) घ्राणम्

95. का सामगानपद्धतिः 'हुँकारेण' प्रारभ्यते ?

(A) प्रतिहारः
(B) उपद्रवः
(C) प्रस्तावः
(D) उद्गीथः

96. संघातपरार्थत्वात् त्रिगुणादिविपर्ययादधिष्ठानात् भोक्तृभावाच्च सिद्धं यत् ____________ ।

(A) पुरुषोऽस्ति
(B) प्रकृतिरस्ति
(C) प्रकृतिपुरुषौ स्तः
(D) महदादयः सन्ति

97. न वेद्मि विद्यासु चतुर्दशस्वयम् – पद्यांशः कस्य महाकवेः ?

(A) माघस्य
(B) कालिदासस्य
(C) भारवेः
(D) श्रीहर्षस्य

98. महानुभावा हि नितान्तमर्थिनः – श्लोकांशः कस्मिन् महाकाव्येऽस्ति ?

(A) किरातार्जुनीये
(B) शिशुपालवधे
(C) रघुवंशे
(D) बुद्धचरिते

99. छन्दसां प्रथममङ्गं किम् ?

(A) न्यायशास्त्रम्
(B) व्याकरणशास्त्रम्
(C) ज्यौतिषम्
(D) वेदान्तशास्त्रम्

100. महाकवीनां वाणीषु किं वस्तु विद्यते ?

(A) प्रतीयमानम्
(B) प्रमाणम्
(C) अर्थतत्त्वम्
(D) शब्दतत्त्वम्

---

**Space for Rough Work**